# Kamala Trishati

# કમલાત્રિશતી

## Document Information

Text title : kamalAtrishatI

File name : kamalA300.itx

Category : shatI, devii, lakShmI, devI, trishatI, dashamahAvidyA

Location : doc_devii

Transliterated by : Sridhar Seshagiri sridhar.seshagiri at gmail.com

Proofread by : Sridhar Seshagiri sridhar.seshagiri at gmail.com

Latest update : July 15, 2003

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 28, 2022

*sanskritdocuments.org*

# કમલાત્રિશતી

ગઙ્ગાધરમખિવિરચિતા ।
પરમાભરણં વિષ્ણોર્વક્ષસિ સા સાગરેન્દ્રવરપુત્રી ।
યા મૂર્તિર્મતી કાલે ક્ષમા જનાનાં કૃતાપરાધાનામ્ ॥ ૧ ॥

સા નઃ શ્રેયો દદ્યાત્ કમલા કમલાસનાદિજનનીં યામ્ ।
સંપ્રાપ્ય સહચરીં હરિરવતિ જગન્ત્યનાકુલં સતતમ્ ॥ ૨ ॥

નિત્યશ્રેયોદાને ખ્યાતા યા હરિગૃહસ્ય સર્વસ્વમ્ ।
શ્રુતિમૌલિસ્તુતવિભવા સા ભાતુ પુરઃ સદાસ્માકમ્ ॥ ૩ ॥

વિષ્ણુક્રીડાલોલા વિખ્યાતા દીનરક્ષણે લક્ષ્મીઃ ।
જનની નઃ સ્ફુરતુ સદા તેન વયં કિલ કૃતાર્થાઃ સ્મઃ ॥ ૪ ॥

નિર્વાણાઙ્કુરજનની કાલે સા સાર્વભૌમપદદોગ્ધ્રી ।
નિરસતિમોહસમૂહા મમ દૈવતમાદૃતં ગુરુભિઃ ॥ ૫ ॥

વિષ્ણોર્વક્ષસિ લસિતા શીતમયૂખસ્ય સોદરી કમલા ।
કમલાયતનયના નઃ પાતુ સદા પાપરાશિભ્યઃ ॥ ૬ ॥

કવિપરિષદા ચ વેદૈઃ નિત્યં સ્તુતનિજમહોદયા કમલા ।
મનસિ મમ સંનિધત્તાં ત્વમિતાનન્દાય લોકનાથેન ॥ ૭ ॥

દુગ્ધોદધિતનયા સા દુરિતનિહન્ત્રી કૃતપ્રણામાનામ્ ।
આનન્દપદવિધાત્રી પત્યા સાકં પદે પદે લોકે ॥ ૮ ॥

મન્મથજનની સા મામવતુ સરોજા(ક્ષ)ગેહિની કમલા ।
યામારાધ્ય બુધેન્દ્રા વિશન્તિ પરમં તુ તત્ પદં વિષ્ણોઃ ॥ ૯ ॥

સત્સૂક્તિકૃતિવિધાત્રી નમતામમ્બા ત્રિલોક્યાસ્તુ ।
નિત્યપ્રસાદભૂમ્ના રક્ષતિ મામાદરાત્ કમલા ॥ ૧૦ ॥

મમ સૂક્તિરઞ્જલિપુટઃ પ્રણતિશ્ચાનેકસંખ્યાકા ।

કુતુકાત્ ક્ષીરોદસુતામમિતાનન્દાય ગાહતે કમલામ્ ॥ ૧૧ ॥

યા પારમાર્થ્યસરણિઃ સા કમલા નિશ્ચિતા વેદૈઃ ।
સૈષા હિ જગન્માતા સંસૃતિતાપાપહન્ત્રી ચ ॥ ૧૨ ॥

મન્દસ્મિતમધુરાનનમમન્દસંતોષદાયિ ભજતાં તત્ ।
કમલારૂપં તેજો વિભાતુ નિત્યં મદીયહૃત્કમલે ॥ ૧૩ ॥

કાલે ક્ષપયતિ કમલા કટાક્ષધાટ્યા  હિ મામકં દુરિતમ્ ।
અત એવાશ્રિતરક્ષણદીક્ષેત્યેવં જનો વદતિ ॥ ૧૪ ॥

નવનવહર્મ્યવિધાત્રી નાકિકિરીટાર્ચિતા ચ સા દેવી ।
જ્યોતિર્મણ્ડલલસિતા મુનિહૃદયાબ્જાસના ચ સદ્ગતિદા ॥ ૧૫ ॥

સંવીક્ષ્ય જલધિતનયાં ભૂયો ભૂયઃ પ્રણમ્ય ભક્તગણઃ ।
નિરસિતદુરિતૌઘઃ સન્ સ્તૌતિ મુદા મોક્ષસિદ્ધ્યે કમલામ્ ॥ ૧૬ ॥

રાકાનિશીવ દેવ્યાં દૃષ્ટાયાં ભક્તગણવાણી ।
ભજતે જલનિધિશૈલીં સાઙ્ગોપાઙ્ગં કૃતાનન્દા ॥ ૧૭ ॥

દુર્ગતિભીત્યા ખિન્નઃ સોઽહં શરણં ભજામિ તાં કમલામ્ ।
શરણાર્થિનાં હિ રક્ષાકૃદિતિ ખ્યાતા હિ યા લોકે ॥ ૧૮ ॥

ન હિ કલયતે હૃદન્તે મન્દારં કામધેનું વા ।
યઃ સેવતે મુકુન્દપ્રિયાં શ્રિયં નિત્યભાવેન ॥ ૧૯ ॥

કૈટભમર્દનમહિષીં મમાઞ્જલિર્ગાહતાં કાલે ।
ન હિ નાથનીયમત્ર ક્ષમાતલે સા પ્રસન્નાસ્તુ ॥ ૨૦ ॥

સંતાપપીડિતં મામવતુ સદા શ્રીર્હરિપ્રિયા માતા ।
રક્ષિતવાયસમુખ્યા કૃપાનિધિઃ પુણ્યકૃદ્દૃશ્યા ॥ ૨૧ ॥

ન હિ કેવલં પ્રણામૈઃ સ્તુત્યા ભક્ત્યા સમારાધ્યા ।
સત્યેન ધર્મનિવહૈર્ભાવેન ચ કમલગેહિની કમલા ॥ ૨૨ ॥

કદાચિત્કવિલોકેઽપ્યક્ષીણાનન્દદાયિની કમલા ।
રક્ષતુ કટાક્ષકલિકાઙ્કૂરૈર્ભક્તાનિહાદરતઃ ॥ ૨૩ ॥

કલિપાપગ્લપિતાનાં મુરમર્દનદિવ્યગેહિની લક્ષ્મીઃ ।
રાજતિ શરણં પરમં વશીકૃતેશા ચ વિબુધગણસેવ્યા ॥ ૨૪ ॥

નિત્યોલ્લસદુરુમાલા વક્ષસિ કમલા હરેર્ભાતિ ।
નિજતનુભાસા દ્યોતિતકૌસ્તુભમણિરમ્બુધેસ્તનયા ॥ ૨૫ ॥

માતર્મઙ્ગલદાયિન્યમરેન્દ્રવધૂસમર્ચિતાઙ્ઘ્રિયુગે ।
માં પાહ્યપાયનિવહાત્ સંતતમકલક્ષમામૂર્તે ॥ ૨૬ ॥

યદિ કલિતા ચોપેક્ષા નશ્યેત્ કિલ તાવકી મહતી ।
કીર્તિરતોઽમ્બ કટાક્ષૈઃ પરિષિઞ્ચ મુદા મુહુઃ શીતૈઃ ॥ ૨૭ ॥

ધનધાન્યસુતાદિરુચિગ્રસ્તં માં પાહિ કમલે ત્વમ્ ।
તેનોર્જિતકીર્તિઃ સ્યા માતસ્ત્વં સર્વરક્ષિણી ખ્યાતા ॥ ૨૮ ॥

તવ પાદામ્બુજયુગલધ્યાનં માતર્મદીયમઘમાશુ ।
કબલીકરોતિ કાલે તેનાહં સિદ્ધસંકલ્પઃ ॥ ૨૯ ॥

અઞ્જલિકલિકા હિ કૃતા યદિ તસ્યૈ મુરનિહન્તૃદયિતાયૈ ।
રસનાગ્રે ખેલનભાક્ તસ્ય તુ પુંસો ગિરાં દેવી ॥ ૩૦ ॥

માતસ્તવ મૂર્તિરિયં સુધામયી નિશ્ચિતા નિપુણૈઃ ।
યત્ તદ્દર્શનભૂમ્ના નિરસ્તતાપા બુધા ભવન્ત્યચિરાત્ ॥ ૩૧ ॥

કલિતજગત્ત્રયરક્ષાભરાણિ મયિ દેવિ સંવિધેહિ મુદા ।
ત્વદ્વીક્ષણાનિ કમલે તેનાહં સિદ્ધસંકલ્પઃ ॥ ૩૨ ॥

વરદે મુરારિદયિતે જયન્તિ તે વીક્ષણાનિ યાનિ દિવિ ।
સંપ્રાપ્ય તાનિ મઘવા વિજિતારિર્દેવસંઘવન્દ્યશ્ચ ॥ ૩૩ ॥

મોહાન્ધકારભાસ્કરમમ્બ કટાક્ષં વિધેહિ મયિ કમલે ।
યેનાપ્તજ્ઞાનકલાઃ સ્તુવન્તિ વિબુધાસ્ત્વદીયસદસિ કલમ્ ॥ ૩૪ ॥

કામક્રોધાદિમહાસત્ત્વનિરાસં કૃપાસારાત્ ।
કુરુ માતર્મમ સંસૃતિભીતિં ચ નિરાકુરુ ત્વમેવારાત્ ॥ ૩૫ ॥

મૂઢાનામપિ હૃદ્યાં કવિતાં દાતું યદીયપરિચર્યા ।
પ્રભવતિ કાલે સા હિ શ્રીરમ્બા નઃ પ્રસન્નાસ્તુ ॥ ૩૬ ॥

દિવ્યક્ષેત્રેષુ બુધા દિનકરમધ્યે ચ વેદમૌલૌ ચ ।
યત્સ્થાનમિતિ વદન્તિ શ્રીરેષા ભાતિ સંશ્રિતહરિર્હિ ॥ ૩૭ ॥

નિજલીલાક્રાન્તહરી રક્ષતિ કમલા કટાક્ષધાટ્યા નઃ ।
શરણાર્થિનશ્ચ કાલે વિહગોરગપશુમુખાનુર્વ્યામ્ ॥ ૩૮ ॥

સમરાઙ્ગણેષુ જયદા ત્રિદશાનાં મૌલિભિર્માન્યા ।
આપદિ રક્ષણદક્ષા સા કમલા નઃ પ્રસન્નાસ્તુ ॥ ૩૯ ॥

નિત્યાનન્દાસનભાઙ્ નવનિધિવન્દ્યા ચ સાગરેન્દ્રસુતા ।
વિલસતિ માધવવક્ષસિ પાલિતલોકત્રયા ચ જનની નઃ ॥ ૪૦ ॥

મુનિનુતનિજપરિપાટી વાગ્ધાટી દાનલોલુપા ભજતામ્ ।
શિક્ષિતરિપુજનકોટી વિલસતિ ધૃતશાતકુમ્ભમયશાટી ॥ ૪૧ ॥

નિખિલાગમવેદ્યપદા નિત્યં સદ્ભિઃ સમારાધ્યા ।
સંસૃતિપાશનિહન્ત્રી યા તસ્યૈ ચાઞ્જલિઃ ક્રિયતે ॥ ૪૨ ॥

ભૂયાંસિ નમાંસિ મયા ભક્ત્તેન કૃતાનિ કમલજાઙ્ઘ્રિયુગે ।
નિત્યં લગન્તુ તેન હિ સર્વા રાજન્તિ સંપદો માન્યાઃ ॥ ૪૩ ॥

નિત્યં નિર્મલરૂપે બરદે વારાશિકન્યકે માતઃ ।
સદ્ગુણરક્ષણદીક્ષે પાહીતિ વદન્તમાશુ માં પાહિ ॥ ૪૪ ॥

ભુવનજનનિ ત્વમારાત્ કૃતરક્ષણસંતતિઃ ક્ષમામૂર્તે ।
પ્રતિવસ્તુ રમે કલિતસ્વરૂપશક્ત્યા હિ રાજસે જગતિ ॥ ૪૫ ॥

જય જય કલશાબ્ધિસુતે જય જય હરિવલ્લભે રમે માતઃ ।
પ્રાતરિતિ વિબુધવર્યાઃ પઠન્તિ નામાનિ તે હિ મે ગુરવઃ ॥ ૪૬ ॥

નેત્રરુચિવિજિતશારદપદ્મે પદ્મે નમસ્તુભ્યમ્ ।
તેન વયં ગતવિપદઃ સા મુક્તિઃ કરગતા કલિતા ॥ ૪૭ ॥

સતતં બદ્ધાઞ્જલિપુટમુપાસ્મહે તચ્છુભપ્રદં તેજઃ ।
યત્ કમલોદરનિલયં કમલાક્ષપ્રીતિવીચિકાપૂરમ્ ॥ ૪૮ ॥

સ્ફુરતુ મમ વચસિ કમલે ત્વદીયવૈભવસુધાધારા ।
નિત્યં વ્યક્તિં પ્રાપ્તા ધુતનુતજનખેદજાલકા મહતી ॥ ૪૯ ॥

કમલે તવ નુતિવિષયે બુદ્ધિર્જાતા હિ મે સહસા ।
તેન મમ ભાગધેયં પરિણતમિત્યેવ નિત્યસંતુષ્ટઃ ॥ ૫૦ ॥

કવિતારસપરિમિલિતં કરોતિ વદનં નતાનાં યા ।
સ્તોતું તાં મે હ્યારાત્ સા દેવી સુપ્રસન્નાસ્તુ ॥ ૫૧ ॥

હરિગૃહિણિ તાવકં નુતરૂપં યે ભુવિ નિજે હૃદમ્ભોજે ।

ધ્યાયન્તિ તેષુ વિબુધા અપિ કલ્પકકુસુમમર્પયન્તિ મુદા ॥ ૫૨ ॥

નાનાવરદાનકલાલોલુપહૃદયે હૃદમ્ભુજસ્થે મામ્ ।
રક્ષાપાયાત્ સહસા કુરુ ભક્તં દોષહીનં ચ ॥ ૫૩ ॥

નિજઘનકેશરુચા જિતનીલામ્બુધરે શશાઙ્કસહજન્મન્ ।
પદ્મે ત્વદીયરૂપં મનોહરં ભાતુ મે હૃદયે ॥ ૫૪ ॥

ઘનકુઙ્કુમલસિતાઙ્ગં મુક્તાહારાદિભૂષિતં મધુરમ્ ।
મન્દસ્મિતમધુરાસ્યં સૂર્યેન્દુવિલોચનં ચ બુધમાન્યમ્ ॥ ૫૫ ॥

નિબિડકુચકુમ્ભયુગલં નિજદૃગ્જિતહરિણશાબકાક્ષિયુગમ્ ।
લીલાગતિજિતકલભં મધુવૈરિમનોહરં ચ સુરમાન્યમ્ ॥ ૫૬ ॥

દિશિ દિશિ વિસ્તૃતસંપદ્વિલાસમધુરં ચ કુન્દદન્તાલિ ।
મદનજનકં ચ વિષ્ણોઃ સર્વસ્વં સર્વદાનચણમ્ ॥ ૫૭ ॥

કુલદૈવતમસ્માકં સંવિદ્રૂપં નતાર્તિહરરૂપમ્ ।
નાનાદુર્ગતિહરણક્ષમમમરીસેવિતં સકલમ્ ॥ ૫૮ ॥

પઞ્ચદશવર્ણમાનં પયોજવક્ત્રં પિતામહસમર્ચ્યમ્ ।
જગદવનજાગરૂકં હરિહરસંમાન્યવૈભવં કિમપિ ॥ ૫૯ ॥

કરુણાપૂરિતનયનં પરમાનન્દપ્રદં ચ પરિશુદ્ધમ્ ।
આગમગણસંવેદ્યં કોશગૃહં સર્વસંપદાં નિત્યમ્ ॥ ૬૦ ॥

માતસ્તાવકપાદામ્બુજયુગલં સંતતં સ્ફુરતુ ।
તેનાહં તવ રૂપં દ્રક્ષ્યામ્યાનન્દસિદ્ધયે સકલમ્ ॥ ૬૧ ॥

દેવ્યા કટાક્ષિતાઃ કિલ પુરુષા વા યોષિતઃ પશવઃ ।
માન્યન્તે સુરસંસદિ કલ્પકકુસુમૈઃ કૃતાર્હણાઃ કાલે ॥ ૬૨ ॥

સુમનોવાઞ્છાદાને કૃતાવધાનં ધનં વિષ્ણોઃ ।
ધિષણાજાડ્યાદિહરં યદ્વીક્ષણમામનન્તિ જગતિ બુધાઃ ॥ ૬૩ ॥

અન્તરપિ બહિરુદારં તવ રૂપં મન્ત્રદેવતોપાસ્યમ્ ।
જનનિ સ્ફુરતુ સદા નઃ સંમાન્યં શ્રેયસે કાલે ॥ ૬૪ ॥

મુરરિપુપુણ્યશ્રેણીપરિપાકં તાવકં રૂપમ્ ।
કમલે જનનિ વિશુદ્ધં દદ્યાચ્છ્રેયો મુહુર્ભજતામ્ ॥ ૬૫ ॥

પુણ્યશ્રેણી કમલા સા જનની ભક્તમાનસે સ્થિતિભાક્ ।
તેજસ્તતિભિર્મોહિતભુવના ભુવનાધિનાથગૃહિણીયમ્ ॥ ૬૬ ॥

જલનિધિકન્યારૂપં હરિમાન્યં સર્વસંપદાં હેતુઃ ।
ચિરકૃતસુકૃતવિશેષાન્નયનયુગે ભાતિ સર્વસ્ય ॥ ૬૭ ॥

જલનિધિતપઃફલં યન્મુનિજનહૃદયાબ્જનિત્યકૃતનૃત્તમ્ ।
કરુણાલોલાપાઙ્ગં તત્ તેજો ભાતુ નિઃસમં વદને ॥ ૬૮ ॥

શમિતનતદુરિતસંઘા હરયે નિજનેત્રકલ્પિતાનઙ્ગા ।
કૃતસુરશાત્રવભઙ્ગા સા દેવી મઙ્ગલૈસ્તુઙ્ગા ॥ ૬૯ ॥

નિખિલાગમસિદ્ધાન્તં હરિશુદ્ધાન્તં સદા નૌમિ ।
તેનૈવ સર્વસિદ્ધિઃ શાસ્ત્રેષુ વિનિશ્ચિતા વિબુધૈઃ ॥ ૭૦ ॥

કૃષ્ણકૃતવિવિધલીલં તવ રૂપં માતરાદરાન્માન્યમ્ ।
સ્ફુરતુ વિલોચનયુગલે નિત્યં સંપત્સમૃદ્ધ્યૈ નઃ ॥ ૭૧ ॥

કરુણાકટાક્ષલહરી કામાયાસ્તુ પ્રકામકૃતરક્ષા ।
લક્ષ્મ્યા માધવમાન્યા સત્સુખદાને દિશિ ખ્યાતા ॥ ૭૨ ॥

અપવર્ગસિદ્ધયે ત્વામમ્બામમ્ભોજલોચનાં લક્ષ્મીમ્ ।
અવલમ્બે હરિદયિતે પદ્માસનમુખસુરેન્દ્રકૃતપૂજામ્ ॥ ૭૩ ॥

તાવકકટાક્ષલહરીં નિધેહિ મયિ દેવિ કમલે ત્વમ્ ।
તેન મનોરથસિદ્ધિર્ભુવિ પરમે ધામનિ પ્રચુરા ॥ ૭૪ ॥

ત્વામાદરેણ સતતં વીક્ષેમહિ માતરબ્જકૃતવાસામ્ ।
વિષ્ણોર્વક્ષોનિલયામક્ષયસુખસિદ્ધયે લોકે ॥ ૭૫ ॥

સા નઃ સિધ્યતુ સિદ્ધ્યૈ દેવાનાં વાઙ્મમનોઽતીતા ।
હરિગૃહિણી હરિણાક્ષી પાલિતલોકત્રયા ચ જનનીયમ્ ॥ ૭૬ ॥

સકલચરાચરચિન્મયરૂપં યસ્યા હિ દેવતોપાસ્યમ્ ।
સા દદતુ મઙ્ગલં મે નિત્યોજ્જ્વલમાદરાજ્જનની ॥ ૭૭ ॥

શીતમયૂખસહોદરિ તાં ત્વામમ્બાં હિ શીલયે નિત્યમ્ ।
નિરસિતવૈરિગણોઽહં હરિચરણન્યસ્તરક્ષશ્ચ ॥ ૭૮ ॥

દિક્ષિ વિદિક્ષુ કૃતશ્રીઃ સા મે જનની નદીશતનયેયમ્ ।
હરિણા સાકં ભજતુ પ્રાકાશ્યં હૃદિ સતાં સમૃદ્ધ્યૈ નઃ ॥ ૭૯ ॥

વારિનિધિવંશસંપદ્ દિવ્યા કાચિદ્ધરેર્માન્યા ।
અર્ચન્તિ યાં તુ મુનયો યોગારમ્ભે તથાન્તે ચ ॥ ૮૦ ॥

ધૃતસુમમધુપક્રીડાસ્થાનાયિતકેશભારાયૈ ।
નમ ઉક્તિરસ્તુ માત્રે વાગ્જિતપીયૂષધારાયૈ ॥ ૮૧ ॥

સંદેહે સિદ્ધાન્તે વાદે વા સમરભૂમિભાગે વા ।
યા રાજતિ બહુરૂપા સા દેવી વિષ્ણુવલ્લભા ખ્યાતા ॥ ૮૨ ॥

પ્રતિફલતુ મે સદા તન્મુનિમાનસપેટિકારત્નમ્ ।
વિષ્ણોર્વક્ષોભૂષણમાદૃતનિર્ગતિજનાવનં તેજઃ ॥ ૮૩ ॥

બાલકુરઙ્ગવિલોચનધાટીરક્ષિતસુરાદિ મનુજાનામ્ ।
નયનયુગાસેવ્યં તદ્ ભાતીહ ધરાતલે તેજઃ ॥ ૮૪ ॥

માધવદૃક્સાફલ્યં ભક્તાવલિદૃશ્યકામધેનુકલા ।
લક્ષ્મીરૂપં તેજો વિભાતુ મમ માનસે વચસિ ॥ ૮૫ ॥

હરિસરસક્રીડાર્થં યા વિધૃતાનેકરૂપિકા માતા ।
સા ગેહભૂષણં નઃ સ્ફુરતુ સદા નિત્યસંપૂજ્યા ॥ ૮૬ ॥

દ્વારવતીપુરભાગે મૈથિલનગરે ચ યત્કથાસારઃ ।
સા દેવી જલધિસુતા વિહરણભાઙ્ મામકે મનસિ ॥ ૮૭ ॥

જલનિધિતપોમહિમ્ને દેવ્યૈ પરમાત્મનઃ શ્રિયૈ સતતમ્ ।
ભૂયાંસિ નમાંસિ પુનઃ સર્વા નઃ સંપદઃ સન્તુ ॥ ૮૮ ॥

પરમૌષધં હિ સંસૃતિવ્યાધેર્યત્ કીર્તિતં નિપુણૈઃ ।
તદહં ભજામિ સતતં લક્ષ્મીરૂપં સદાનન્દમ્ ॥ ૮૯ ॥

દશરથસુતકોદણ્ડપ્રભાવસાક્ષાત્કૃતે કૃતાનન્દા ।
સીતારૂપા માતે જન્ને યજ્ઞાક્ષિતૌ હિ સા સિદ્ધ્યૈ ॥ ૯૦ ॥

મુનિજનમાનસનિલયે કમલે તે ચરણપઙ્કજં શિરસિ ।
અવતંસયન્નુદારં વિશામિ દેવૈઃ સુધર્માં વા ॥ ૯૧ ॥

ધનમદમેદુરસેવાં ત્યક્તવાહં તે પદામ્ભોજમ્ ।
શરણં યામિ પુમર્થસ્ફૂર્તિકલાયૈ ભૃશં દીનઃ ॥ ૯૨ ॥

ન ઘટય કુત્સિતસેવાં દુષ્ટૈર્વા સંગમં માતઃ ।

કુરુ માં દાસં સંસૃતિપાપં ચ હર શીઘ્રમ્ ॥ ૯૩ ॥

મયિ નમતિ વિષ્ણુકાન્તે તવાગ્રતસ્તાપભારાર્તે ।
માતઃ સહસા સુમુખી ભવ બાલે દોષનિલયે ચ ॥ ૯૪ ॥

હન્ત કદા વા માતસ્તવ લોચનસેચનં ભવેન્મયિ ભોઃ ।
ઈત્થં પ્રાતઃ સ્તુવતાં ત્વમેવ રક્ષાકરી નિયતમ્ ॥ ૯૫ ॥

સંસારરોગશાન્તિપ્રદમેતલ્લોચનં માતઃ ।
તાવત્કમહમુપાસે દિવ્યૌષધમાશુ સાગરેન્દ્રસુતે ॥ ૯૬ ॥

સંસૃતિરોગાર્તાનાં તવ નામસ્મરણમત્ર ધરણિતલે ।
પૂજાપ્રદક્ષિણાદિકમાર્યા મુખ્યૌષધં વદન્તિ કિલ ॥ ૯૭ ॥

માતર્વિના ધરણ્યાં સુકૃતાનાં ખણ્ડમિહ જન્તુઃ ।
ધ્યાનં વા ન હિ લભતે પ્રણતિં વા સંપદાં જનનીમ્ ॥ ૯૮ ॥

ગુરુવરકટાક્ષવિભવાદ્ દેવિ ત્વાઙ્ઘ્રિપ્રણામધુતપાપઃ ।
તવ ચ હરેર્દાસઃ સન્ વિશામિ દેવેશ માનિતાં ચ સભામ્ ॥ ૯૯ ॥

મુરહરનેત્રમહોત્સવતારુણ્યશ્રીર્નિરસ્તનતશત્રુઃ ।
લલિતલિકુચાભકુચભરયુગલા દૃગ્વિજિતહરિણસંદોહા ॥ ૧૦૦ ॥

કારુણ્યપૂર્ણનયના કલિકલ્મષહારિણી ચ સા કમલા ।
મુખજિતશારદકમલા વક્ત્રામ્ભોજે સદા સ્ફુરતુ માતા ॥ ૧૦૧ ॥

તાવકકટાક્ષસેચનવિભવાં નિર્ધૂતદુરિતસંઘા હિ ।
પરમં સુખં લભન્તે પરે તુ લોકે ચ સૂરિભિઃ સાર્ધમ્ ॥ ૧૦૨ ॥

તવ પાદપદ્મવિસૃમરકાન્તિઝરીં મનસિ કલયંસ્તુ ।
નિરસિતનરકાદિભયો વિરાજતે નાકિસદસિ સુરવન્દ્યઃ ॥ ૧૦૩ ॥

હન્ત સહસ્રેષ્વથ વા શતેષુ સુકૃતી પુમાન્ માતઃ ।
તાવકપાદપયોરુહવરિવસ્યાં કલયતે સકલમ્ ॥ ૧૦૪ ॥

જનનિ તરઙ્ગય નયને મયિ દીને તે દયાસ્નિગ્ધે ।
તેન વયં તુ કૃતાર્થા નાતઃ પરમસ્તિઃ નઃ પ્રાર્થ્યમ્ ॥ ૧૦૫ ॥

તાવકકૃપાવશાદિહ નાનાયોગાદિનાશિતભયા યે ।
તેષાં સ્મરણમપિ દ્રાક્ શ્રિયાવહં નિત્યમાકલયે ॥ ૧૦૬ ॥

નૈવ પ્રાયશ્ચિત્તં દુરિતાનાં મામકાનાં હિ ।
ત્વામેવ યામિ શરણં તસ્માલ્લક્ષ્મિ ક્ષમાધારે ॥ ૧૦૭ ॥

મુરવૈરિમાન્યચરિતે માતસ્ત્વામખિલલોકસામ્રાજ્યે ।
પશ્યન્તિ દિવિ સુરેન્દ્રા મુનયસ્તત્ત્વાર્થિનશ્ચ નિત્યકલામ્ ॥ ૧૦૮ ॥

સ્વીયપદપ્રાપ્ત્યૈ નનુ વિબુધેશા જલધિકન્યકે માતઃ ।
આરાધ્ય દિવ્યકુસુમૈસ્તવ પાદાબ્જં પરં તુષ્ટાઃ ॥ ૧૦૯ ॥

સૃષ્ટિસ્થિત્યાદૌ હરિરમ્બ તવાપાઙ્ગવીક્ષણાદરવાન્ ।
જગદેતદવતિ કાલે ત્વં ચ હરિર્નઃ ક્રમાત્ પિતરૌ ॥ ૧૧૦ ॥

રાજ્યસુખલાભસંપત્પ્રાપ્ત્યૈ ક્ષિતિપાશ્ચ યે ચ વિપ્રાદ્યાઃ ।
ગાઙ્ગજલૈરપિ કુસુમૈર્વરિવસ્યાં તે ક્રમેણ કલયન્તિ ॥ ૧૧૧ ॥

સંત્યક્તકામતદનુજડમ્ભાસૂયાદયો નરાઃ કમલે ।
આરાધ્ય ત્વાં ચ હરિં કાલે ચૈકાસનસ્થિતાં ધન્યાઃ ॥ ૧૧૨ ॥

જનની કદા પુનીતે મમ લોચનમાર્ગમાદરાદેષા ।
યે કિલ વદન્તિ ધન્યાસ્તેષાં દર્શનમહં કલયે ॥ ૧૧૩ ॥

કરધૃતલીલાપદ્મા પદ્મા પદ્માક્ષગેહિની નયને ।
સિઞ્ચતિ સકલશ્રેયઃપ્રાપ્ત્યૈ નિર્વ્યાજકારુણ્યા ॥ ૧૧૪ ॥

નાનાવિધવિદ્યાનાં લીલાસદનં સરોજનિલયેયમ્ ।
કવિકુલવચઃપયોજદ્યુમણિરુચિર્ભાતિ નઃ પુરત્ઃ ॥ ૧૧૫ ॥

અતસીકુસુમદ્યુતિભાઙ્ નાકિગણૈર્વન્દ્યપાદપદ્મયુગા ।
સરસિજનિલયા સા મે પ્રસીદતુ ક્ષિપ્રમાદરાત્ સિદ્ધ્યૈ ॥ ૧૧૬ ॥

જગદીશવલ્લભે ત્વયિ વિન્યસ્તભરઃ પુમાન્ સહસા ।
તીર્ત્વા નાકિસ્થાનં વિશતિ પરં વૈષ્ણવં સુરૈર્માન્યમ્ ॥ ૧૧૭ ॥

માતર્જ્ઞાનવિકાસં કારય કરુણાવલોકનૈર્મધુરૈઃ ।
તેનાહં ધન્યતમો ભવેયમાર્યાવૃતે સદસિ ॥ ૧૧૮ ॥

હરિવક્ષસિ મણિદીપપ્રકાશવત્યાન્યા માત્રા ।
નિત્યં વયમિહ દાસાઃ શ્રિયા સનાથા મુદા પરં નૌમઃ ॥ ૧૧૯ ॥

વિદ્રાવયતુ સરોજાસને ત્વદીયા કટાક્ષધાટી નઃ ।
અજ્ઞાનાઙ્કુરમુદ્રાં પુનરપિ સંસારભીતિદાં સહસા ॥ ૧૨૦ ॥

તાવકકટાક્ષસૂર્યોદયે મદીયં હૃદમ્ભોજમ્ ।
ભજતે વિકાસમચિરાત્ તમોવિનાશશ્ચ નિશ્ચિતો વિબુધૈઃ ॥ ૧૨૧ ॥

લક્ષ્મીકટાક્ષલહરી લક્ષ્મીં પક્ષ્મલયતિ ક્રમાન્નમતામ્ ।
પાદપયોરુહસેવા પરં પદં ચિત્સુખોલ્લાસમ્ ॥ ૧૨૨ ॥

ચિદ્રૂપા પરમા સા કમલેક્ષણનાયિકા મુદે ભજતામ્ ।
યત્પ્રણયકોપકાલે જગદીશઃ કિંકરો ભવતિ ॥ ૧૨૩ ॥

કાચન દેવી વિહરતુ મમ ચિત્તે સંતતં સિદ્ધ્યૈ ।
યાપત્યં કલશાબ્ધેરુરગેશયસત્કલત્રં ચ ॥ ૧૨૪ ॥

અષ્ટસુ મહિષીષ્વેકા કમલા મુખ્યા હિ નિર્દિષ્ટા ।
અનયૈવ સર્વજગતામુદયાદિસ્તન્યતે કાલે ॥ ૧૨૫ ॥

કૈવલ્યાનન્દકલાકન્દમહં સંતતં વન્દે ।
તત્તુ મુકુન્દકલત્રં ચિન્તિતફલદાનદીક્ષિતં કિમપિ ॥ ૧૨૬ ॥

ઈક્ષે કમલામેનામમ્બામમ્ભોજલોચનાં સતતમ્ ।
મન્દસ્મિતમધુરાસ્યાં નિત્યં ચાજ્ઞાતકોપમુખદોષામ્ ॥ ૧૨૭ ॥

અઙ્કિતમાધવવક્ષઃસ્થલા સરોજેક્ષણા ચ હરિકાન્તા ।
કબલયતિ માનસં મે દયાપ્રસારાદિભિર્નિત્યમ્ ॥ ૧૨૮ ॥

ભૂત્યૈ મમ ભવતુ દ્રાગજ્ઞાનધ્વંસિની નમતામ્ ।
નાથાનુરૂપરૂપા શ્રુત્યન્તેડ્યા દશાવતારેષુ ॥ ૧૨૯ ॥

સકલજનરક્ષણેશુ પ્રણિહિતનયના ત્રિલોકમાતા નઃ ।
પુષ્ણાતિ મઙ્ગલાનાં નિકરં સેવાક્રમેણ incomplete ॥ ૧૩૦ ॥

પદ્માસનજનની માં પાતુ મુદા સુન્દરાપાઙ્ગૈઃ ।
સર્વૈશ્વર્યનિદાનં યામાહુર્વૈદિકા દીપ્તામ્ ॥ ૧૩૧ ॥

નાનાલંકારવતી મુનિમાનસવાસિની હરેઃ પત્ની ।
ત્રૈલોક્યવિનુતવિભવા માં પાયાદાપદાં નિચયાત્ ॥ ૧૩૨ ॥

વિદ્રાવયતુ ભયં નઃ સા કમલા વિષ્ણુવલ્લભા માતા ।
અબ્ધિઃ સંક્ષુભિતોડભૂત્ યદર્થમાર્યેણ રામેણ ॥ ૧૩૩ ॥

ભૂયો યદર્થમિન્દ્રઃ સુરતરુકુસુમાર્થિના ચ કૃષ્ણેન ।

હતગર્વોઽજનિ યુદ્ધે સા નિત્યં શ્રેયસે ભૂયાત્ ॥ ૧૩૪ ॥

ત્વામારાધ્ય જના અપિ ધનહીનાઃ સૌધમધ્યતલભાજઃ ।
નાનાદેશવનીપકજનસ્તુતા ભાન્તિ નિત્યમેવ રમે ॥ ૧૩૫ ॥

સંસૃતિતાપો ન ભવતિ પુનરપિ યત્પાદપઙ્કજં નમતામ્ ।
સા મયિ કલિતદયા સ્યાદમ્બા વિષ્ણોઃ કલત્રમનુરૂપમ્ ॥ ૧૩૬ ॥

જનનીકટાક્ષભાજામિહ મર્ત્યાનાં સુરાસ્તુ કિંકરતામ્ ।
રિપવો ગિરિતટવાસં ભજન્તિ વેશ્માનિ સિદ્ધયઃ સર્વાઃ ॥ ૧૩૭ ॥

સ્મરણાદ્વા ભજનાદ્વા યસ્યાઃ પાદામ્બુજસ્ય ભુવિ ધન્યાઃ ।
હન્ત રમન્તે સ્તમ્બેરમનિવહાવૃતગૃહાઙ્ગણે મનુજાઃ ॥ ૧૩૮ ॥

ચિરકૃતસુકૃતનિષેવ્યા સા દેવી વિષ્ણુવલ્લભા ખ્યાતા ।
યસ્યાઃ પ્રસાદભૂમ્ના જાતાઃ પશ્ચાદયો વદાન્યા હિ ॥ ૧૩૯ ॥

અમ્બ મધુરાન્ કટાક્ષાન્ તાપહરાન્ વિકિર મયિ કૃપાજલધે ।
યે વિન્યસ્તાઃ કરિવરમારુતિમુખભક્તવર્યેષુ ॥ ૧૪૦ ॥

અમૃતલહરીવ મધુરા જલધરરુચિરા નતાર્તિહરશીલા ।
સર્વશ્રેયોદાત્રી કાચિદ્ દેવી સદા વિભાતુ હૃદિ ॥ ૧૪૧ ॥

ગીતાચાર્યપુરન્ધ્રી ત્વદીયનામપ્રભાવકલનાદ્યૈઃ ।
યમભયવાર્તા દૂરે હરિસાંનિધ્યં કુતો ન સ્યાત્ ॥ ૧૪૨ ॥

જલનિધિતનયે કાન્તે વિષ્ણોરુષ્ણાંશુચન્દ્રનયને તે ।
ચતુરાનનાદયસ્તુ ખ્યાતા બાલાઃ શ્રુતૌ ચોક્તાઃ ॥ ૧૪૩ ॥

મનસિજવૈરં ગાત્રં વાણી સૌધારસી ચ યદ્ભજતામ્ ।
શ્લાઘ્યા સંપત્ સજ્જનસમાગમશ્ચાશુ સિધ્યન્તિ ॥ ૧૪૪ ॥

સફલયતુ નેત્રયુગલં હતનતદુરિતા ચ સા પરા દેવી ।
જલનિધિકન્યા માન્યા પત્યવતારાનુકૂલનિજચરિતા ॥ ૧૪૫ ॥

નિત્યં સ્મરામિ દેવીં નમતાં સર્વાર્થદાયિનીં કમલામ્ ।
યામાહુર્ભવનિગલધ્વંસનદીક્ષાં ચ incomplete ॥ ૧૪૬ ॥=૨૦
સકલજગદઘનિવારણસંકલ્પાં મધુજિતો દયિતામ્ ।
જીવાતુમેવ કલયે મોક્ષાર્થિજનસ્ય ભૂમિસુતામ્ ॥ ૧૪૭ ॥

મન્દાનામપિ દયયા તમોનિરાસં વિતન્વન્તી ।

સર્વત્ર ભાતિ કમલા તનુરિવ વિષ્ણોર્નિરસ્તાદ્યા ॥ ૧૪૮ ॥

બાલમરાલીગત્યૈ સુરપુરકન્યાદિમહિતકલગીત્યૈ ।
વિરચિતનાનાનીત્યૈ ચેતો મે સ્પૃહયતે બહુલકીર્ત્યૈ ॥ ૧૪૯ ॥

અભિલષિતદાનકુશલા વાગ્દેવીવન્દિતા ચ સા કમલા ।
નિત્યં માનસપદ્મે સંચારં કલયતે મુહુઃ કુતુકાત્ ॥ ૧૫૦ ॥

મુરમથનનયનપઙ્કજવિલાસકલિકા સુરેશમુખસેવ્યા ।
ભૂતમયી સાવિત્રી ગયત્રી સર્વદેવતા જયતિ ॥ ૧૫૧ ॥

સા હિ પરા વિદ્યા મે લક્ષ્મીરક્ષોભણીયકીર્તિકલા ।
હૃદ્યાં વિદ્યાં દયાદદ્ય શ્રેયઃપરંપરાસિદ્ધ્યૈ ॥ ૧૫૨ ॥

કામજનની હિ લક્ષ્મીઃ નાનાલીલાદિભિર્નિજં નાથમ્ ।
મોહયતિ વિષ્ણુમચિરાત્ પ્રકૃતીનાં ક્ષેમસિદ્ધ્યર્થમ્ ॥ ૧૫૩ ॥

મનસિજસામ્રાજ્યકલાનિદાનમાર્યાભિવન્દિતં કિમપિ ।
લક્ષ્મીરૂપં તેજો વિલસતિ મમ મનસિ વિષ્ણુસંક્રાન્તમ્ ॥ ૧૫૪ ॥

વિષ્ણુમનોરથપાત્રં સંતપ્તસ્વર્ણકામ્યનિજગાત્રમ્ ।
આશ્રિતજલનિધિગોત્રં  રક્ષિતનતબાહુજચ્છાત્રમ્ ॥ ૧૫૫ ॥

કવિકુલજિહ્વાલોલં મુરમર્દનકલિતરમ્યબહુલીલમ્ ।
નિરસિતનતદુષ્કાલં વન્દે તેજઃ સદાલિનુતશીલમ્ ॥ ૧૫૬ ॥

આદિમપુરુષપુરન્ધ્રીમમ્બામમ્ભોજલોચનાં વન્દે ।
યાં નત્વા ગતતાપાસ્ત્યક્ત્વા દેહં વિશન્તિ પરમપદમ્ ॥ ૧૫૭ ॥

લક્ષ્મ્યા હરિરપિ ભાતિ પ્રકૃતિક્ષેમાય દીક્ષિતાયાસૌ ।
મમ લોચનયોઃ પુરતો લસતુ ગભીરં ક્રિયાસિદ્ધ્યૈ ॥ ૧૫૮ ॥

જનનિ કદા વા નેષ્યામ્યહમારાદર્ચિતત્વદીયપદઃ ।
નિમિષમિવ હન્ત દિવસન્ દૃષ્ટ્વા ત્વામાદરેણ કલ્યાણીમ્ ॥ ૧૫૯ ॥

સંપૂર્ણયૌવનોજ્જ્વલદેહાં યાં વીક્ષ્ય શૌરિરપિ ।
કુસુમશરવિદ્ધચેતાઃ કિંકરભાવં સ્વયં પ્રાપ્તઃ ॥ ૧૬૦ ॥

અનુનયશીલસ્તદનુ પ્રણયક્રોધાદિના ભીતઃ ।
આદિમપુરુષઃ સોઽયં સા લક્ષ્મીર્ન શ્રિયૈ ભવતુ ॥ ૧૬૧ ॥

મણિકુણ્ડલલસિતાસ્યં કૃપાકરં કિમપિ કુઙ્કુમચ્છાયમ્ ।
હરિણા કૃતસંચારં તેજો મે ભાતુ સર્વદા સિદ્ધ્યૈ ॥ ૧૬૨ ॥

સામ્રાજ્યમઙ્ગલશ્રીઃ શ્રીરેષા પુષ્કરાક્ષસ્ય ।
ગન્ધર્વકન્યકાદ્યૈર્ગઙ્ગાતીરેષુ ગીતકીર્તિર્હિ ॥ ૧૬૩ ॥

કવિતાભાગ્યવિધાત્રી પરિમલસંક્રાન્તમધુપગણકેશા ।
મમ નયનયોઃ કદા વા સા દેવી કલિતસંનિધાનકલા ॥ ૧૬૪ ॥

કીર્તિઃ સ્વયં વૃણીતે વાગ્દેવી ચાપિ વિજયલક્ષ્મીશ્ચ ।
તં નરમચિરાલ્લોકે યો લક્ષ્મીપાદભક્તસ્તુ ॥ ૧૬૫ ॥

સન્મિત્રં પાણ્ડિત્યં સદ્દારાઃ સત્સુતાદ્યાશ્ચ ।
જાયન્તે તસ્ય ભુવિ શ્રીભક્તો યશ્ચ નિર્દિષ્ટઃ ॥ ૧૬૬ ॥

પરમાચાર્યૈર્વિનુતાં તામમ્બામાદરાન્નૌમિ ।
પરમૈશ્વર્યં વિષ્ણોરપિ યા વેદેષુ નિર્દિષ્ટા ॥ ૧૬૭ ॥

કવિકુલસૂક્તિશ્રેણીશ્રવણાનન્દોલ્લસદ્વતંસસુમા ।
સા દેવી મમ હૃદયે કૃતસાંનિધ્યા વિરાજતે પરમા ॥ ૧૬૮ ॥

તાપાર્તાસ્તુ તટાકં યથા ભજન્તે રમાં દેવીમ્ ।
સંસૃતિતપ્તાઃ સર્વે યાન્તિ હિ શરણં શરણ્યાં તામ્ ॥ ૧૬૯ ॥

સર્વજ્ઞત્વં શ્લાઘ્યં ધરાધિપત્યં રમે દેવિ ।
યદ્યત્ પ્રાર્થ્યં દયયા તદ્ દિશ મોક્ષં ચ મે જનનિ ॥ ૧૭૦ ॥

વિદ્યુતમચઞ્ચલાં ત્વાં કૃષ્ણે મેઘે પયોધિવરકન્યે ।
નિત્યમવૈમિ શ્રેયઃસિધ્ય માતઃ પ્રસન્ને નઃ ॥ ૧૭૧ ॥

ત્વામમ્બ સંતતરુચિં કૃષ્ણો મેઘઃ સમાસાદ્ય ।
સદ્ધર્મનિ વર્ષતિ કિલ કાઙ્ક્ષાધિકમાદરેણ વાર્ધિસુતે ॥ ૧૭૨ ॥

અમ્બ ત્વમેવ કાલે મુકુન્દમપિ દર્શયન્તીહ ।
શ્રેયઃસિદ્ધ્યૈ નમતાં ભાસિ હૃદિ શ્રુતિશિરઃસુ સલ્લોકે ॥ ૧૭૩ ॥

વિનમદમરેશસુદતીકચસુમમકરન્દધારયા સ્નિગ્ધમ્ ।
તવ પાદપદ્મમેતત્ કદા નુ મમ મૂર્ધ્નિ ભૂષણં જનનિ ॥ ૧૭૪ ॥

અપવર્ગસૌખ્યદે તે દયાપ્રસારઃ કથં વર્ણ્યઃ ।
યામવલમ્બ્ય હિ યષ્ટિં ન પતતિ સંસારપઙ્કિલે માર્ગે ॥ ૧૭૫ ॥

સૂક્ષ્માત્ સૂક્ષ્મતરં તે રૂપં પશ્યન્તિ યોગિનો હૃદયે ।
તાં ત્વામહં કદા વા દ્રક્ષ્યેઽલંકારમણ્ડિતાં માતઃ ॥ ૧૭૬ ॥

ચિરતરતપસા ક્લિષ્ટે યોગિહૃદિ સ્થાનભાગ્ રમા દેવી ।
દર્શનમચિરાદ્ દયયા દદાતિ યોગાદિહીનાનામ્ ॥ ૧૭૭ ॥

તીરં સંસૃતિજલધેઃ પૂરં કમલાક્ષલોચનપ્રીતેઃ ।
સારં નિગમાન્તાનાં દૂરં દુર્જનતતેર્હિ તત્તેજઃ ॥ ૧૭૮ ॥

લક્ષ્મીરૂપં તેજો મમાવિરસ્તુ શ્રિયૈ નિત્યમ્ ।
યન્નિત્યધર્મદારાન્ વિષ્ણોરમિતૌજસઃ પ્રાહુઃ ॥ ૧૭૯ ॥

જલધિસુતે ત્વં જનની સ વાસુદેવઃ પિતા ચ નઃ કથિતઃ ।
શરણં યુવાં પ્રપન્ના નાતો દુર્ગતિપરિસ્ફૂર્તિઃ ॥ ૧૮૦ ॥

હરિનીલરત્નભાસા પ્રકશિતાત્મા સમુદ્રવરકન્યા ।
મઙ્ગલમાતનુતેયં કટાક્ષકલિકાપ્રસારૈસ્તુ ॥ ૧૮૧ ॥

મચ્ચિત્તમત્તવારણબન્ધનમધુના ત્વદીયપાદયુગે ।
કલયામિ રમે માતર્માં રક્ષ ક્ષિપ્રમેવ સંસૃતિતઃ ॥ ૧૮૨ ॥

મોચય સંસૃતિબન્ધં કટાક્ષકલિકાઙ્કુરૈ રમે માતઃ ।
નાતઃ પરમર્થ્યમિહ ક્ષમાતલે ત્વં દયામૂર્તિઃ ॥ ૧૮૩ ॥

મઞ્જુલકવિતાસંતતિબીજાઙ્કુરદાયિસારસાલોકા ।
જનનિ તવાપાઙ્ગશ્રીઃ જયતિ જગત્રાણકલિતદીક્ષેયમ્ ॥ ૧૮૪ ॥

અમ્બ તવાપાઙ્ગશ્રીરપાઙ્ગકેલીશતાનિ જનયન્તી ।
મુરહન્તુર્હૃદિ જયતિ વ્રીડામદમોહકામસારકરી ॥ ૧૮૫ ॥

બદ્ધમપિ ચિત્તમેતદ્ યમનિયમાદ્યૈઃ પરિષ્કારૈઃ ।
ધાવતિ બલાદ્ રમે તવ પાદાબ્જં યામિ શરણમહમ્ ॥ ૧૮૬ ॥

મત્તગજમાન્યગમના મધુરાલાપા ચ માન્યચરિતા સા ।
મન્દસ્મેરમુખાબ્જા કમલા મે હૃદયસારસે લસતુ ॥ ૧૮૭ ॥

શાસ્ત્રસ્મરણવિહીનં પાપિનમેનં જનં રમા દેવી ।
દયયા રક્ષતિ કાલે તસ્યાસ્તેન પ્રથા મહતી ॥ ૧૮૮ ॥

મુખવિજિતચન્દ્રમણ્ડલમિદમમ્ભોરુહવિલોચનં તેજઃ ।

ધ્યાને જપે ચ સુદૃશાં ચકાસ્તિ હૃદયે કવીશ્વરાણાં ચ ॥ ૧૮૯ ॥

અમ્બ વિવેકવિદૂરં જનમેનં શિશિરલોચનપ્રસરૈઃ ।
શિશિરય કૃપયા દેવિ ત્વમેવ માતા હિ લોકસ્ય ॥ ૧૯૦ ॥

કોપદુપેક્ષસે યદિ માતર્મે રક્ષકઃ કઃ સ્યાત્ ।
મયિ દીને કો લાભસ્તવ તુ દયાયાઃ પ્રસારિણ્યાઃ ॥ ૧૯૧ ॥

ભવચણ્ડકિરણતપ્તઃ શ્રાન્તોઽહં જ્ઞાનવારિદૂરસ્થઃ ।
શિશિરામઙ્ઘ્રિચ્છાયાં તવ માતર્યામિ શરણમારાત્તુ ॥ ૧૯૨ ॥

માતરશોકોલ્લાસં પ્રકટય તવ કોમલકટાક્ષૈઃ ।
યૈર્દીના નરપતયઃ કલિતા વારણશતાવૃતે ગેહે ॥ ૧૯૩ ॥

જયતિ રમે તવ મહતી કૃપાઝરી સર્વસંમાન્યા ।
ક્ષેમંકરી યદેષા પ્રતિકલ્પં સર્વજગતાં ચ ॥ ૧૯૪ ॥

અજ્ઞાનકૂપકુહરે પતિતં માં પાહિ કમલે ત્વમ્ ।
નગરે વા ગ્રામે વા વનમધ્યે દિક્ષુ રક્ષિણી ત્વમસિ ॥ ૧૯૫ ॥

તવ ચરણૌ શરણમિતિ બ્રુવન્નહં માતરબ્ધિતનયે ત્વમ્ ।
હરિણા સહિતા દયયા પ્રાહ્યવિલમ્બેન દીનં મામ્ ॥ ૧૯૬ ॥

પરિસરનતવિબુધાલીકિરીટમણિકાન્તિવલ્લરીવિસરૈઃ ।
કૃતનીરાજનવિધિ તે મમ તુ શિરોભૂષણં હિ પદયુગલમ્ ॥ ૧૯૭ ॥

મમ હૃદયપઙ્કજવનીવિકાસહેતૌ દિનાધિપાયેતામ્ ।
તવ તુ કટાક્ષપ્રસરઃ દીપાયેતાં તમોનિરાકરણે ॥ ૧૯૮ ॥

યાવચ્છરણં યાતિ ક્ષિતિતનયે ત્વાં હિ જન્તુરિહ મૂઢઃ ।
તાવત્ તસ્ય તુ રસનાઙ્ગણે તુ વાણી સમાકલિતનૃત્તા ॥ ૧૯૯ ॥

પઙ્કજનિલયે તાવકચરણં શરણં સમાકલયે ।
તેન હિ સર્વકૃતાનાં ભવિષ્યતાં હાનિરેવ દુરિતાનામ્ ॥ ૨૦૦ ॥

શ્રુત્યન્તસેવિતં તે ચરણસરોજં પ્રણમ્ય કિલ જન્તુઃ ।
છત્રોલ્લસિતશિરાઃ સન્ વનીપકાન્ દાનવારિણા સિઞ્ચન્ ॥ ૨૦૧ ॥

વિષ્વક્સેનમુખાદ્યૈઃ સેવિતમમ્બ ત્વદીયપાદયુગમ્ ।
અવતંસયન્તિ સન્તઃ કલિતાપપ્રશમનાયાસ્તુ ॥ ૨૦૨ ॥

દુગ્ધોદધિતનયે ત્વાં દિશાગજેન્દ્રાઃ સુવર્ણઘટતોયૈઃ ।
મણિમણ્ટપમધ્યતલે સમભ્યષિઞ્ચન્ હરિપ્રીત્યૈ ॥ ૨૦૩ ॥

દિગ્ગજપુષ્પકરકુમ્ભૈરભિષિક્તાં ત્વાં હરિઃ પ્રીત્યા ।
ઉદવહદારાન્મુનિગણમધ્યે સર્વશ્રિયો મૂલમ્ ॥ ૨૦૪ ॥

જાતપરાક્રમકલિકા દિશિ દિશિ કિંનરસુગીતનિજયશસઃ ।
ધન્યા ભાન્તિ હિ મનુજાઃ યદ્વીક્ષાલવવિશેષતઃ કાલે ॥ ૨૦૫ ॥

નમદમરીકચભરસુમમરન્દધારાભિષિક્તં તે ।
પદકમલયુગલમેતચ્છ્રેયઃસ્ફૂર્ત્યૈ સદા ભવતુ ॥ ૨૦૬ ॥

રાગદ્વેષાદિહતં મામવ કમલે હરેઃ કાન્તે ।
દર્શય દયયા કાલે હ્યપવર્ગસ્થાનમાર્ગં ચ ॥ ૨૦૭ ॥

ન હિ જાને વર્ણયિતું પરમે સ્થને ત્વદીયવિભવમહમ્ ।
મુનયશ્ચ સુરા વેદા યતો નિવૃત્તાઃ ક્ષમાતનયે ॥ ૨૦૮ ॥

મનુજાઃ કટાક્ષિતાઃ કિલ તથામ્બયા મેદિનીપુત્ર્યા ।
સત્સુતકલત્રસહિતાઃ સુરભિં કાલેન નિર્વિશાન્તિ મુદા ॥ ૨૦૯ ॥

જલધીશકન્યકા સા લસતુ પુરોઽસ્માકમાદરકૃતશ્રીઃ ।
યત્પ્રણમનાજ્જનાનાં કવિતોન્મેષઃ સદીડિતે ભાતિ ॥ ૨૧૦ ॥

દૂરિકરોતુ દુરિતં ત્વદ્ભક્તિર્મામકં કમલે ।
અહમપિ સુરેશસેવ્યે તવ સદસિ વિશામિ કીર્તિગાનપરઃ ॥ ૨૧૧ ॥

પરમજ્ઞાનવિધાત્રી તવ પાદપયોજભક્તિરસ્માકમ્ ।
કિં વાશાસ્યમતોઽન્યત્ સમુદ્રતનયે હરેર્જાયે ॥ ૨૧૨ ॥

અમ્બ કદા વા લપ્સ્યે મદીયપાપાપનોદાય ।
તવ પાદકમલસેવામબ્જભવાદ્યૈસ્તુ સંપ્રાર્થ્યામ્ ॥ ૨૧૩ ॥

મન્દાનામપિ મઞ્જુલકવિત્વરસદાયિની જનની ।
કાપિ કરુણામયી સા લસતુ પુરસ્તાત્ સદાસ્માકમ્ ॥ ૨૧૪ ॥

સકલકવિલોકવિનુતે કમલે કમલાક્ષિ વલ્લભે વિષ્ણોઃ ।
ત્વન્નામાનિ હિ કલયે વને જલે શત્રુપીડાયામ્ ॥ ૨૧૫ ॥

દિવિ વા ભુવિ દિક્ષુ જલે વહ્નૌ વા સર્વતઃ કમલે ।
જન્તૂનાં કિલ રક્ષા ત્વદધીના કીર્ત્યતે વિબુધૈઃ ॥ ૨૧૬ ॥

કુશલવિધયે તદસ્તુ ત્રિવિક્રમાસેવ્યરમ્યનિજકેલિ ।
કબલિતપદનતદૈન્યં તરુણામ્બુજલોચનં તેજઃ ॥ ૨૧૭ ॥

જનની સુવર્ણવૃષ્ટિપ્રદાયિની ભાતિ વિષ્ણુવક્ષઃસ્થા ।
કમલા કલિતક્ષેમા પ્રકૃતીનાં શીતલાપાઙ્ગૈઃ ॥ ૨૧૮ ॥

જગતામાદિમજનની લસતિ કવેરાત્મજાપુલિને ।
ક્ષેત્રેષૂત્તમજુષ્ટેષ્વયોનિજા લોકરક્ષાયૈ ॥ ૨૧૯ ॥

કુચશોભાજિતવિષ્ણુઃ કુઙ્કુમપઙ્કાઙ્કિતા કમલા ।
કાઞ્ચ્યાં રાજતિ કાઞ્ચીમણિગણનીરાજિતાઙ્ઘ્રિયુગા ॥ ૨૨૦ ॥

મન્દારકુસુમમદહરમન્દસ્મિતમધુરવદનપઙ્કરુહા ।
હૃદ્યતમનિત્યયૌવનમણ્ડિતગાત્રી વિરાજતે કમલા ॥ ૨૨૧ ॥

કંસરિપુગેહિની સા હંસગતિર્હંસમાન્યનિજચરિતા ।
સંસારતાપહાનિં કલયતુ કાલે રમાસ્માકમ્ ॥ ૨૨૨ ॥

મનસિજજનની જનની ચાસ્માકમિહાદરાત્ કાલે ।
શીતલલોલાપાઙ્ગૈસ્તરઙ્ગયતિ શ્રેયસાં સરિણમ્ ॥ ૨૨૩ ॥

તવ મન્દહાસકલિકાં ભજે ભુજઙ્ગે શયાનં તમ્ ।
યા કલયતિ ગતકોપં બાલાનાં નઃ કૃતાપરાધાનામ્ ॥ ૨૨૪ ॥

સા સાધયેદભીષ્ટં કમલા શ્રીર્વિષ્ણુવક્ષઃસ્થા ।
યસ્યાઃ પદવિન્યાસઃ શ્રુતિમૌલિષુ તન્યતે મહાલક્ષ્મ્યાઃ ॥ ૨૨૫ ॥

શાન્તિરસનિત્યશેવધિમમ્બાં સેવે મનોરથાવાપ્ત્યૈ ।
યામારાધ્ય સુરેશાઃ સ્વપદં પ્રાપુર્હિ તાદૃક્ષમ્ ॥ ૨૨૬ ॥

ધાતુરપિ વેદવચસાં દૂરે યત્સ્થાનમામનન્તિ બુધાઃ ।
સાસ્તુ મુદે શ્રીરેષા મુરમર્દનસત્કલત્રમમિતૌજઃ ॥ ૨૨૭ ॥

ભવદુઃખરાશિજલધેર્હઠાત્ તરિત્રીં પરં વિઘ્નઃ ।
તામમ્બાં કમલસ્થાં મુરારિવક્ષોમણિપ્રદીપાં ચ ॥ ૨૨૮ ॥

મુનિસાર્વભૌમવર્ણિતમહાચરિત્રં હરેઃ કલત્રં તત્ ।
પથિ મઙ્ગલાય ભવતુ પ્રસ્થાનજુષાં કૃપાધારમ્ ॥ ૨૨૯ ॥

ખણ્ડિતવૈરિગણેયં મણ્ડિતભક્તા સુતાદ્યૈશ્ચ ।

ભાસુરકીર્તિર્જયતિ ક્ષોણીસુરવન્દ્યચરણાબ્જા ॥ ૨૩૦ ॥

નતપાલિનિ માં પાહિ ત્રિજગદ્વન્દ્યે નિધેહિ મયિ દયયા ।
તાવકકટાક્ષલહરીઃ શક્તિમયે સકલસિદ્ધીનામ્ ॥ ૨૩૧ ॥

ભવસાગરં તિતીર્ષુસ્તવ ચરણાબ્જં મહાસેયુમ્ ।
માતઃ કદા નુ લપ્સ્યે ઘનતાપોર્મ્યાદિપીડિતો દીનઃ ॥ ૨૩૨ ॥

કવિવાગ્વાસન્તીનાં વસન્તલક્ષ્મીર્મુરારિદયિતા નઃ ।
પરમાં મુદં વિધત્તે કાલે કાલે મહાભૂત્યૈ ॥ ૨૩૩ ॥

સુરહરપરતન્ત્રં તદ્ ગતતન્દ્રં વસ્તુ નિસ્તુલમુપાસે ।
તેનૈવાહં ધન્યો મદ્વંશ્યા નિરસિતાત્મતાપભરાઃ ॥ ૨૩૪ ॥

તૃષ્ણાં શમયતિ દેવી રાઘવદયિતા નતાલિસુરવલ્લી ।
ઇટ્યાર્યવચો ધૈર્યં જનયતિ કાલે ધરાપુત્રિ ॥ ૨૩૫ ॥

રઘુપતિદયિતે માતઃ કાકાસુરરક્ષણાદિના લોકે ।
તાવકકરુણામહિમા પ્રથિતઃ કિલ ભૂતિદાયી નઃ ॥ ૨૩૬ ॥

પ્રચુરતદુરિતપાલીસમાવૃતાનાં કલૌ હિ તમાનામ્ ।
તાવકદયા હિ માતઃ શરણં વરમિતિ સતાં ગણઃ સ્તૌતિ ॥ ૨૩૭ ॥

અત્યન્તશીતલાં તાં કટાક્ષધાટીમુપાસેઽહમ્ ।
તેન મમ ત્રિદશાનાં ન કોઽપિ ભેદો ધરાતનયે ॥ ૨૩૮ ॥

યૈઃ સેવા સંકલિતા તવ પાદાબ્જે ધરાતનયે ।
તેષામજ્ઞાનઝરી યાતિ હિ વિલયં ક્ષણેનૈવ ॥ ૨૩૯ ॥

જ્ઞાનારવિન્દવિલસનમચિરાદસ્ય સ્તુતૌ હિ કવિવર્યાઃ ।
સંપદ્ દિવ્યા ચ તથા વિબુધાવલિમાનનીયાત્ર ॥ ૨૪૦ ॥

માતસ્તવ પાદાબ્જં યસ્ય લલાટે કૃતોરુનિજકાન્તિ ।
તત્પાદપદ્મમચિરાદ્ વિમાનગા દેવતા વહતિ ॥ ૨૪૧ ॥

આજ્ઞાવશેન દેવ્યા લસન્તિ દિવિ દેવતામાન્યાઃ ।
ઇન્દ્રાદ્યાઃ સ ચ ધાતા દિક્પાલાશ્ચાપિ ગન્ધર્વાઃ ॥ ૨૪૨ ॥

કૈવલ્યાનન્દકલાદાત્રીં કમલામહર્નિશં નૌમિ ।
તેનૈવ જન્મ સફલં તીર્થાદિનિષેવણાદ્યચ્ચ ॥ ૨૪૩ ॥

યચ્ચ હરિપાદપઙ્કેરુહપરિચરણાદિના લોકે ।
તત્ સર્વમાશુ ઘટયતિ સહસા મન્દસ્ય મે માતા ॥ ૨૪૪ ॥

નાનાશ્રુત્યન્તકલાપરિમલપરિવાહવાસિતં માતઃ ।
તવ ચરણકમલયુગલં મમાવતંસઃ ક્ષણં ભાતુ ॥ ૨૪૫ ॥

નતદેવનગરનારીધમ્મિલ્લલસત્સુમાલિકૃતનાદાઃ ।
પ્રાતર્મુરજવિલાસં કલયન્તિ ભૃશં તવાગ્રતો ભૃઙ્ગાઃ ॥ ૨૪૬ ॥

પાપપ્રશમનદીક્ષાકલાધુરીણાઃ પયોજનિલયે તે ।
માં ચ પવિત્રીકુર્યુઃ પાદપરાગાઃ કૃપાવશતઃ ॥ ૨૪૭ ॥

હન્ત કદા વા લપ્સ્યે તવાઙ્ઘ્રિશુશ્રૂષણાસક્તિમ્ ।
સહજાનન્દં તેન હિ પદં ક્રમાત્ પ્રાપ્યમાદિષ્ટમ્ ॥ ૨૪૮ ॥

નલિનીવિલાસરુચિરાં મયિ દેવિ ત્વત્કટાક્ષલહરીં હિ ।
કાલે નિધેહિ દયયા સ્ફીતા તે કીર્તિરાદૃતા સર્વૈઃ ॥ ૨૪૯ ॥

વિનિહતદુરિતસ્તોમા કાપિ મદીયે હૃદમ્ભોજે ।
લસતુ પરદેવતાખ્યા માધવનેત્રપ્રિયંકરી કલિકા ॥ ૨૫૦ ॥

પઞ્ચાયુધગુરુમન્ત્રં કલનૂપુરનિનદમાદરાત્ કમલે ।
કલયતિ રમાધવગૃહં યાતું કાલે ત્વયિ પ્રવૃત્તાયામ્ ॥ ૨૫૧ ॥

નતનાકિલોકવનિતાલલાટસિન્દૂરશોણકાન્તિભૃતોઃ ।
કલયે નમાંસિ કમલે તવ પાદપયોજયોર્નિત્યમ્ ॥ ૨૫૨ ॥

કમલસુષુમાનિવાસસ્થાનકટાક્ષં ચિરાય કૃતરક્ષમ્ ।
રક્ષોગણભીતિકરં તેજો ભાતિ પ્રકામમિહ મનસિ ॥ ૨૫૩ ॥

જ્યોત્સ્નેવ શિશિરપાતા કટાક્ષધાટી ત્વદીયા હિ ।
અમ્બ મુકુન્દ ( ... incomplete ... ) કુરુતે ॥ ૨૫૪ ॥

તાપહરરસવિવર્ષઅધૃતકુતુકા કાપિ નીલનલિનરુચિઃ ।
કાદમ્બિની પુરસ્તદાસ્તાં નઃ સંતતં જનની ॥ ૨૫૫ ॥

સફલયતુ નેત્રયુગલં મામકમેતત્ ત્વદીયરૂપમહો ।
યત્ કમલનેત્રસુચરિતપચેલિમં વૈદિકી શ્રુતિર્બ્રૂતે ॥ ૨૫૬ ॥

માધવનેત્રપયોજામૃતલહરી ભાતિ તાવકં રૂપમ્ ।
અમ્બ યુવામાદ્યૌ નઃ પિતરૌ વને સુખાવાસ્યૈ ॥ ૨૫૭ ॥

સરસકવિતાદિસંપદ્વિલસનમારાદુશાન્તિ કવિવર્યાઃ ।
યત્પ્રીણનેન સા મે ભવતુ વિભૂત્યૈ હિ સા કમલા ॥ ૨૫૮ ॥

મનસિજજયાદિકાર્યં યદપાઙ્ગલવાન્નૃણાં ભવતિ ।
તત્પદમાનન્દકલં સેવ્યં ચ ભજે રમાં જનનીમ્ ॥ ૨૫૯ ॥

શિથિલતતમઃસમૂહા ભક્તાનાં સા રમા દેવી ।
જનયતિ ધૈર્યં ચ હરેઃ કાલે યા સર્વદા સેવ્યા ॥ ૨૬૦ ॥

યદ્ભ્રૂવિલાસવશતઃ શક્તઃ સૃષ્ટ્યાદિકં કર્તુમ્ ।
હરિરપિ લોકે ખ્યાતઃ સા નઃ શરણં જગન્માતા ॥ ૨૬૧ ॥

નયનયુગલીં કદા મે સિઞ્ચતિ એવ્યાઃ પરં રૂપમ્ ।
યદ્ભજનાન્ન હિ લોકે દૃષ્ટં શ્લાઘ્યં પરં વસ્તુ ॥ ૨૬૨ ॥

સુચરિતફલં ત્વદીયં રૂપં નઃ કલિતભક્તીનામ્ ।
અત એવ મામકાનાં પાપાનાં વિરતિરૂર્જિતા કમલે ॥ ૨૬૩ ॥

સુકૃતિવિભવાદુપાસ્યા કમલા સા સર્વકલ્યાણા ।
હરિવક્ષસિ કૃતવાસા રક્ષતિ લોકાનહોરાત્રમ્ ॥ ૨૬૪ ॥

સંવિદ્રૂપા હિ હરેઃ કુટુમ્બિની ભાતિ ભક્તહૃદયેષુ ।
સર્વશ્રેયઃપ્રાપ્ત્યૈ યાં વિદુરાર્યા રમાં કમલામ્ ॥ ૨૬૫ ॥

વિષયલહરીપ્રશાન્ત્યૈ કમલાપાદામ્બુજં નૌમિ ।
પૂર્વં શુકાદિસુધિયો યદ્ધ્યાનાદ્ ગલિતશત્રુભયાઃ ॥ ૨૬૬ ॥

લલિતગમનં ત્વદીયં કલનૂપુરનાદપૂરિતં માતઃ ।
નૌમિ પદામ્બુજયુગલં ભવતાપનિરાસનાયાદ્ય ॥ ૨૬૭ ॥

વિરલીકરોતિ તાપં કમલાયા મન્દહાસઝરી ।
યત્સેવનેષુ સમુદિતકૌતુકરસનિર્ભરો હરિર્જયતિ ॥ ૨૬૮ ॥

પ્રતિફલતુ સંતતં મે પુરતો માતસ્ત્વદીયરૂપમિદમ્ ।
યદ્દર્શનરસભૂમ્ના હરિરપિ નાનાસ્વરૂપભાક્ કાલે ॥ ૨૬૯ ॥

અમ્બ તવ ચરણસેવાં સંતતમહમાદરાત્ કલયે ।
તેન મમ જન્મ સફલં ત્રિદશાનામિવ મુનીન્દ્રાણામ્ ॥ ૨૭૦ ॥

દુર્વારગર્વદુર્મતિદુરર્થનિરસનકલાનિપુણાઃ ।

તવ ચરણસેવયૈવ હિ કમલે માતર્બુધા જગતિ ॥ ૨૭૧ ॥

આનદમેતિ માતસ્તવ નામોચ્ચારણેન સિન્ધુભવે ।
સંપ્રાપ્તત્વદ્રૂપં મમ માનસમાત્તયોગકલમ્ ॥ ૨૭૨ ॥

તવ દૃષ્ટિપાતવિભવાત્ સર્વે લોકે વિધૂતતાપભરાઃ ।
યાન્તિ મુદા ત્રિદશૈઃ સહ વિભાનમારુહ્ય માતરહો ॥ ૨૭૩ ॥

કો વા ન શ્રયતિ બુધઃ શ્રેયોઽર્થી તામિમાં કમલામ્ ।
યાં પન્નગારિવાહનસદ્ધર્મિણીમર્ચયન્તિ સુરનાથાઃ ॥ ૨૭૪ ॥

તામરવિન્દનિવાસામમ્બાં શરણાર્થિનાં કલિતરક્ષામ્ ।
બહુરૂપેષ્વઘનિચયેષ્વપિ નિશ્ચિત્યાત્મનો ધૈર્યમ્ ॥ ૨૭૫ ॥

કરુણાપ્રવાહઝર્યા ગતપઙ્કુ ભૂતલં માતઃ ।
સત્વાઙ્કુરાદિલસિતં જયતિ પયોરાશિકકન્યકે કમલે ॥ ૨૭૬ ॥

વિધિશિવવાસવમુખ્યૈર્વન્દ્યપદાબ્જે નમસ્તુભ્યમ્ ।
માતર્વિષ્ણોર્દયિતે સર્વજ્ઞત્વં ચ મે કલય ॥ ૨૭૭ ॥

પરદેવતે પ્રસીદ પ્રસીદ હરિવલ્લભે માતઃ ।
ત્વામાહુઃ શ્રુતયઃ કિલ કલ્યાણગુણાકરાં નિત્યામ્ ॥ ૨૭૮ ॥

ક્ષન્તવ્યમમ્બ મામકમઘરાશિં ક્ષપય વીક્ષણતઃ ।
સત્વોન્મેષં દેહિ પ્રિયે હરેર્દાસમપિ કુરુ મામ્ ॥ ૨૭૯ ॥

વાઞ્છિતસિદ્ધિર્ન સ્યાદ્ યદિ પાદાબ્જે કૃતપ્રણામાનામ્ ।
હાનિસ્ત્વદીયયશસામિતિ કેચિદ્ધૈર્યવન્તશ્ચ ॥ ૨૮૦ ॥

સદસદનુગ્રહદક્ષાં ત્વાં માતઃ સંતતં નૌમિ ।
ગ્રહપીડા નૈવ ભવેદ્યમપીડા દૂરતઃ કાલે ॥ ૨૮૧ ॥

વિદ્યાઃ કલાશ્ચ કાલે કૃપયા કલય પ્રસીદાશુ ।
માતસ્ત્વમેવ જગતાં સર્વેષાં રક્ષણં ત્વયા ક્રિયતે ॥ ૨૮૨ ॥

ઉચ્છેષ્વપિ નીચેષુ પ્રકાશતે તુલ્યમેવ તવ રૂપમ્ ।
એતદ્ દૃષ્ટ્વા ધૈર્યં ઘનાગસોઽપ્યમ્બ જાયતે નનુ મે ॥ ૨૮૩ ॥

કા શઙ્કા તવ વૈભવજાલં વક્તું દિગન્તરે માતઃ ।
વરહારાલંકારાં સેવન્તે ત્વાં હરિત્પતયઃ ॥ ૨૮૪ ॥

કમલાયાશ્ચ હરેરપિ સંદૃષ્ટં દિવ્યદાંપત્યમ્ ।
તાવેવ નઃ પતી કિલ જન્માન્તરપુણ્યપરિપાકાત્ ॥ ૨૮૫ ॥

સર્વાસામુપનિષદાં વિદ્યાનાં ત્વંપરં સ્થાનમ્ ।
અલ્પધિયો વયમેતે ત્વત્સ્તોત્રે ભોઃ કથં શક્તાઃ ॥ ૨૮૬ ॥

સાષ્ટાઙ્ગપ્રણતિરિયં પ્રકલ્પિતા માતરદ્ય તવ ચરણે ।
તેનાહં હિ કૃતાર્થઃ કિં પ્રાર્થ્યં વસ્ત્વતઃ કમલે ॥ ૨૮૭ ॥

સ્તોત્રમિદંહિ મયા તે ચરણામ્ભોજે સમર્પિતં ભક્ત્યા ।
તવ ચ ગુરોરપિ વીક્ષા તત્ર નિદાનં પરં નાન્યત્ ॥ ૨૮૮ ॥

દેહાન્તે નનુ માતર્મોક્ષં ત્રિદશૈઃ સમં દેહિ ।
અહમપિ સામ પઠન્ સન્ ત્વાં ચ હરિં યામિ શરણાર્થી ॥ ૨૮૯ ॥

શુકવાણીમિવ માતર્નિરર્થકાં મદ્વચોભઙ્ગીમ્ ।
આરાચ્છૃણોષિ દયયા તદેવ ચોત્તમપદવ્યક્ત્યૈ ॥ ૨૯૦ ॥

વિદ્યાં કલાં વરિષ્ઠાં અમ્બ ત્વાં સંતતં વન્દે ।
યા વ્યાકરોષિ કાલે વિદ્વદ્ભિર્વેદતત્ત્વાદિ ॥ ૨૯૧ ॥

વૈદુષ્યં વાણ્યાઃ સત્સંપજ્ઝર્યો યદીયવીક્ષણતઃ ।
સિધ્યન્ત્યપિ દેવાનાં સા નઃ શરણં રમા દેવી ॥ ૨૯૨ ॥

વિપુલં શ્રિયો વિલાસં શ્રદ્ધાં ભક્ત્યાદિકં દેહિ ।
અમ્બ પ્રસીદ કાલે તવ પાદાબ્જૈકસેવિનામિહ નઃ ॥ ૨૯૩ ॥

કેચિત્ પ્રાગ્ચઃ કમલાં પ્રાપ્ય હિ શરણં વિપત્કાલે ।
ઝટિતિ વિધૂનિતતાપાઃ સા મે દેવી પ્રસન્નાસ્તુ ॥ ૨૯૪ ॥

મરકતકાન્તિમનોહરમૂર્તિઃ સૈષા રમા દેવી ।
પાતિ સકલાનિ કાલે જગન્તિ કરુણાવલોકાદ્યૈઃ ॥ ૨૯૫ ॥

ભાગીરથીવ વાણી તવ નુતિરૂપા વિરાજતે પરમા ।
ઇહ માતર્યદ્ભજનં સર્વેષાં સર્વસંપદાં હેતુઃ ॥ ૨૯૬ ॥

કલશપયોદધિતનયે હરિપ્રિયે લક્ષ્મિ માતરમ્બેતિ ।
તવ નામાનિ જપન્ સન્ ત્વદ્દાસોઽહં તુ મુક્તયે સિદ્ધઃ ॥ ૨૯૭ ॥

નિખિલચરાચરરક્ષાં વિતન્વતી વિષ્ણુવલ્લભા કમલા ।
મમ કુલદૈવતમેષા જયતિ સદારાધ્યમાન્યપાદકમલા ॥ ૨૯૮ ॥

સર્વજન્તુતવિભવે સંતતમપિ વાઞ્છિતપ્રદે દેવિ ।
અમ્બ ત્વમેવ શરણં તેનાહં પ્રાપ્તસર્વકાર્યાર્થઃ ॥ ૨૯૯ ॥

કમલે કથં નુ વર્ણ્યસ્તવ મહિમા નિગમમૌલિગણવેદ્યઃ ।
ઇતિ નિશ્ચિત્ય પદાબ્જં તવ વન્દે મોક્ષકામોઽહમ્ ॥ ૩૦૦ ॥

ત્વામમ્બ બાલિશોઽહં ત્વચમત્કારૈર્ગિરાં ગુમ્ભૈઃ ।
અયથાયથક્રમં હિ સ્તુવન્નપિ પ્રાપ્તજન્મસાફલ્યઃ ॥ ૩૦૧ ॥

ઇતિ શ્રીકમલાત્રિશતી સમાપ્તા ।

Encoded and proofread by Sridhar Seshagiri seshagir at engineering.sdsu.edu

---

*Kamala Trishati*

pdf was typeset on July 28, 2022

Please send corrections to *sanskrit@cheerful.com*